*Journal of Advances and Scholarly Researches in Allied Education*
*Vol. 16, Issue No. 4, March-2019, ISSN 2230-7540*

# नैषधीयचरितस्य प्रथमसर्गस्य ‘अण्’ प्रत्ययान्तपदानां समीक्षणम्

**Parveen Sharma***

Sanskrit Pali and Natural Department, Maharishi Dayanand University, Rohtak, Haryana

***सार – नैषधीयचरितस्य प्रथमसर्गे अण् प्रत्ययः विभिन्नेष्वर्थेषु 33 वारं प्रयुक्तोऽस्ति। चतुर्दशतमे श्लोके कैतवः शब्दः प्रयुक्तोऽस्ति। शब्दकल्पद्रुमकारः अस्मिन् पदे स्वार्थे ‘अण्’ प्रत्ययः स्वीकरोति।[1] अग्रिमे श्लोके ‘वैधर्सी’ इति पदं प्रयुक्तमस्ति। अस्मिन् पदे आचार्यः शेषराज‘ तस्येदम्[2] इत्यनेन पाणिनीयसूत्रेण ‘अण्’ ‘अण्’ प्रत्ययं स्वीकरोति।[3] एकोनविंशतितमे श्लोके शैशवः पदं प्रयुक्तमस्ति।***

-----------------------------------x-----------------------------------

आचार्यः शेषराजः अस्मिन् पदे भावार्थे इगन्ताच्च लघुपूर्वात्[4] इति पाणिनीय सूत्रेण ‘अण्’ प्रत्ययः स्वीकरोति।[5] तस्मिन्नेव श्लोके ‘यौवनम्’ पदमस्ति। अत्रापि भावार्थे हायनान्तयुवादिभ्योऽण्[6] इति पाणिनीय सूत्रेण अण् प्रत्ययः विहितः। विंशतितमे श्लोके ‘शारदः’ पदं प्रयुक्तम्। अस्मिन् पदे शेषराजशर्मारेग्मी सन्धिवेलाधृतुनक्षत्रेभ्योऽण्[7] इति पाणिनीय् सूत्रेण ‘अण्’ प्रत्ययः स्वीकरोति।[8] पंचविंशतितमे श्लोके ‘चापलं’ पदं प्रयुक्तम्। शब्दकल्पद्रुमकारः अस्मिन् पदे भावार्थे ‘अण्’ प्रत्ययः स्वीकरोति।[9] 31तमे श्लोके ‘भैमी’ इति पदं प्राप्यते। आचार्यरेग्मी अत्र अपत्यार्थकम् ‘अण्’ प्रत्ययं स्वोकरोति।[10] 32 तमे श्लोके वैरोचनिजस्येति पदं प्रयुक्तम्। आचार्यः शेषराजः अत्रापि अपत्यार्थकः अण् प्रत्ययः स्वीकरोति।[11]

36 तमे श्लोके नैषधमिति पदं प्राप्यते। शेषराजः अत्र निषधानामयमित्यस्मिन्नर्थे तस्येदं[12] इति पाणिनीयसूत्रेण अण् प्रत्ययः स्वीकरोति।[13] 39 तमे श्लोके वैभवादिति पदं प्रयुक्तम्। शब्दकल्पद्रुमकारः अत्र भार्वाथकं अण् प्रत्ययं स्वीकरोति।[14] 40 तमे श्लोके मौनम् पदं प्राप्यते। शेषराजः अत्र ‘इगन्ताच्च लघुपूर्वात्[15] इति पाणिनीयसूत्रेण भावार्थकः अण् प्रत्ययः स्वीकरोति।[16] 43 तमे श्लोके नौषधम् पदं पुनप्राप्यते यस्य विवेचनम् पूर्वेण कृतम्। 46 तमे श्लोके ‘भैमी’ पदं पुनः प्राप्यते। अस्मिन्नेव श्लोके ‘पौष्पैः’ पदमपि प्राप्यते। शेषराजः अस्य पदार्थः पुष्पाणमिमे इति करोति।[17] ततः तस्येदमिति[18] पाणिनीय सूत्रेणात्र अण् प्रत्ययो विधीयते। 54 तमे श्लोके ‘चापलं’ पदं प्राप्यते। शेषराजः अत्र युवादित्वात् हायनान्तयुवादिभ्योऽण्[19] इति पाणिनीयसूत्रेण भावार्थकोऽण् प्रत्ययः स्वीकरोति।[20] 55 तमे श्लोके कैतवात् पदम् आयाति। शब्दकल्पद्रुमकारः अत्र स्वार्थकः अण् प्रत्ययः स्वीकरोति।[21] 57 तमे श्लोके पौरूषं पदं प्राप्यते। शेषराजः अस्मिन् पदे अर्थद्वयं स्वीकरोति। पुरूषस्य भावः पौरूषभित्यस्मिन्नर्थे युवादित्वात् अण् प्रत्ययः स्वीकृतः।[22] तेनात्र भावार्थकोऽण् प्रत्ययोऽस्ति। पुरूषः प्रयाणमस्य पौरूषमित्यस्मिन्नर्थे पुरूषहस्तिभ्यामण् च[23] इति पाणिनीयसूत्रेणाण् प्रत्ययः स्वीकृतः[24] श्लोके तु परवत्र्यर्थः प्रयुक्तः। अर्थोयं अधिकपदस्य प्रयोगेणागतः। पूर्ववत्र्यर्थः जवषदस्य प्रयोगेण आगतः। अतः अर्थद्वयस्य प्रयोगः चारूतरः जातः। 60 तमे श्लोके ‘मौनम्’ पदं प्रयुक्तम्। शेषराजः अस्मिन् पदे मुनेर्भावः मौनम्, इत्युक्त्या भावार्थकः अण् प्रत्ययः स्वीकरोति।[25]

63 तमे श्लोके पौरूषे इति पदं प्रयुक्त। शेषराजः अत्र पुरूषस्यार्थः इति पौरूषमिति अर्थं स्वीकरोति[26] तस्मादत्र ‘तस्येदम्’[27] इति पाणिनीयसूत्रेण स्वार्थे अण् प्रत्ययः अस्ति।[28] 67 तमे श्लोके पौरूषः पदम् प्राप्यते। अस्मिन् पदे भावार्थकः अण् प्रत्ययः अस्ति। 71 तमे श्लोके सैन्धवाः पदं प्राप्यते। शेषराजः अस्मिन् पदे सिन्धौ भवाः इति अस्मिन् अर्थे सिन्धुशब्दात् ‘तत्र भवः’[29] इति पाणिनीयसूत्रेण तत्र भवार्थकः अण् प्रत्ययः स्वीकरोति अमरकोशकारः अस्मिन् पदे ‘देशेनदविशेषेऽब्धौ सिन्धुर्नासरिति स्त्रियाम् इति वाक्येन सिन्धुपदस्यार्थः देशविशेषोऽति स्वीकरोति।[30] 78 तमे श्लोके केतकम् पदं प्राप्यते।

www.ignited.in

शेषराजः अस्मिन् पदे तस्य विकारः[31] इति पाणिनीय सूत्रेण अण् प्रत्ययः स्वीकरोति।[32] अत्र 'पुष्पमूलेषु बहुलम्'[33] इति पाणिनीयसूत्रेण तद्धितप्रत्ययस्य लुग्भवति। एव×च लुक्तद्धितलुकि[34] इति पाणिनीयसूत्रेण स्त्रीप्रत्ययस्य लुग्भूत्वा केतकमिति रूपं सम्भवति। 81 तमे श्लोके केतकम् पदं प्राप्यते। शेषराजः अत्र तस्यविकारः[35] इत्यनेन पाणिनीयसूत्रेण अण् प्रत्ययः स्वीकरोति।[36] अत्र पुष्पमूलेषु बहुलम्[37] इति पाणिनीयसूत्रेण तद्धितप्रत्ययस्य लुक् भवति। एव×च लुक्तद्धितलुकि इति अनेन पाणिनीयसूत्रेण स्त्रीप्रत्ययस्य लुग्भवति। 92 तमे श्लोके शाणम् पदं प्राप्यते। शब्दकल्पतुमकारः अस्मिन् पदे 'तेन निर्वृतम्'[38] इति अनेन पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति।[39] शब्दकल्पद्रुमकारः अत्र भावार्थकः अ×ा् (कृदन्तः) प्रत्ययः अपि स्वीकरोति।[40] आप्टे अत्र 'अण्' प्रत्यय एव स्वीकरोति न तु 'घ×ा' ।[41] वाचस्पत्यंकारः अत्र प्रत्ययद्वयस्य उपस्थिति स्वीकरोति।[42] 96 तमे श्लोके वैधवं पदस्य प्रयोग प्राप्यते। शेषराजः अस्मिन् पदे विधो अयमिति वैधवमिति अर्थे स्वीकरोति।[43] तस्येदम्[44] इति अनेन पाणिनीयेन सूत्रेण अण् प्रत्ययः भवति। 99 तमे श्लोके केतकम् पदस्थ प्रयोगः प्राप्यते। शेषराजः अस्मिन् पदे तस्यविकारः[45] इति अनेन पाणिनीयेन सूत्रेण अण् प्रत्ययश्च पुष्पमूलेषु बहुलम्[46] इति अनेन पाणिनीयेन सूत्रेण तस्य लुक् स्वीकरोति।

103 तमे श्लोके पौरूषः पदं प्रयुक्तम्। शेषराजः अस्मिन् पदे भार्वाथकः अण् प्रत्ययः स्वीकरोति।[47] 111 तमे श्लोके कैतवपदस्य प्रयोगः आयाति। शब्दकल्पद्रुमकारः अत्र स्वार्थकः अण् प्रत्ययः स्वीकरोति।[48] 116 तमे श्लोके मैनाकं पदं प्राप्नोति। शब्दकल्पद्रुमकारः अस्मिन् पदे मेनकाया अपत्यं पुमान् इति व्युत्पत्त्या अपत्यार्थकः 'अण्' प्रत्ययः स्वीकरोति।[49] अस्य शब्दस्य साधुत्वाय शब्दकल्पद्रुकारः पृषोदरादित्वम् कारणत्वेन स्वीकरोति।[50] 117 तमे श्लोके नैषधः पदस्य प्रयोगः प्राप्यते। शेषराजः अस्मिन् पदे निषधानामयमिति अस्मिन् अर्थे 'तस्येदम्'[51] पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति।[52] शब्दकल्पद्रुमःकारः अस्य पदार्थः निषधानां राजां इति करोति।[53] 122 तमे श्लोके चामरं पदमायाति। शब्दकल्पद्रुरमकारः अस्मिन् पदे तस्येदम्[54] इति पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति।[55] 124 तमे श्लोके वामनी पदं प्राप्नोति। शेषराजः अस्मिन् पदे वामनस्य इमम् इति अर्थे तस्येदम्[56] इति पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति[57] 'टिड्ढाण×ा...'[58] इति पाणिनीयेन सूत्रेण 'ङीप्' प्रत्यये सति अस्य पदस्य सिद्धिर्भवति। शेषराजः अत्र षिद्गौरादिभ्यश्च[59] इति सूत्रेवापि ङीप्प्रत्ययस्य सम्भावना स्वीकरोति।[60] अस्मिन् एव श्लोके मौनिना पदस्य प्रयोगः प्राप्यते। शेषराजः अस्मिन् पदे 'मुनेर्भावः मौनम्' इति व्युत्पत्या इगन्ताच्च लघुपूर्वात्[61] इति पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति।[62] 145 तमे श्लोके 'नैषधीयचरिते' पदमायाति। शेषराजः अत्र 'निषधानाम्' अयम् नैषधः इति व्युत्पत्त्य। तस्येदम्[63] इति पाणिनीयेन सूत्रेण अण् प्रत्ययः स्वीकरोति।

अयं 'अण्' प्रत्ययान्तपदानां संग्रहोऽस्ति। अस्मिन् सर्गे त्रिवारं स्वार्थकप्रत्ययान्तस्य पदस्य कैतवस्य प्रयोग कृतः। सर्वाधिकं वारं भावार्थकप्रत्ययान्तानां पदानां प्रयोगोस्ति। भावार्थकानि पदानि 11 वारं प्रयुक्तानि चतुर्वारम् अपत्यार्थकानां पदानां प्रयोगः प्राप्यते। सप्तवारं शैषिकाः प्रत्ययाः प्रयुक्ताः। त्रिवारं विकारार्थकाः प्रत्ययाः प्रयुक्ताः। एकवारं भवार्थकः प्रत्ययः प्रयुक्तः।

अस्मिन् शोधपत्रे एषां पदानां सूच्यपि दता। सूच्या ज्ञायते यत् नैषधस्य प्रथमे सर्गे सर्वाधिकं वारं (एकादशवारं) भावार्थकः अण् प्रत्ययः प्रयुक्तः। न्यूनतमतया तु (एकवारं) भवार्थकः अण् प्रत्ययः प्रयुक्तः।

1. कैतव (स्वार्थिक)
2. वैधसी (तस्येदम्)
3. शैशवः (भावार्थक)
4. यौवनम् (भावार्थक) धयनान्तयुवा
5. शरदः (तत्र भव)
6. चपलं (भावार्थक)
7. भैगी (अपत्यार्थक) तस्यापत्यम्
8. चैरोचनिज (अपत्यार्थक)
9. नैषधः (तस्येदम्)
10. वैभवः (भावार्थकः)
11. मौनम् (भावार्थकः)
12. नैषधः (तस्येदम्)
13. भैगी (अपत्यार्थक)
14. पौष्पैः (तस्येदम्)

www.ignited.in

15. चपलम् (भावार्थकः)

16. कैवत (स्वार्थे)

17. पौरूषं (भावार्थकः) (मानार्थक)

18. मौनम् (भावार्थक)

19. पौरूषं (भावार्थकः)

20. सैन्धवाः (तत्र भवः) सिंधुरतशिलादि श्योणऔ

21. केतकम् (तस्य विकारः)

22. पौरूषः (भावार्थकः)

23. कैतवः (स्वार्थिक)

24. मैनाकम् (अपत्यार्थकः)

25. नैषधः (तस्येदम्)

26. चामरम् (तस्येदम्)

27. वामनी (तस्येदम्)

28. केतकम् (तस्य विकारः)

29. शानम् (तेन निर्वृतम्)

30 वैधवम् (तस्येदम्)

31. केतकम् (तस्य विकारः)

32. भौनिना (भावार्थकः)

33. नैषधीयचरिते (तस्येदम्)

## सन्दर्भ ग्रन्थ सूची


1. शब्दकल्पद्रुम एप्लिकेशन

2. पा.अ. ....

3. नैषधीयचरितम् पृ.सं. 21

4. पा.अ. .....

5. नैषधीयचरितम् पृ.सं. 24

6. पाणिनीय अष्टाध्यायी .....

7. पाणिनीय अष्टाध्यायी .....

8. नैषधीयचरितम् पृ.सं. 26

9. शब्दकल्पद्रुम एप्लिकेशन

10. नैषधीयचरितम् पृ.सं. 36

11. वही, पृ.सं. 36

12. पा.अ. ....

13. नैषधीयचरितम् पृ.सं. 41

14. शब्दकल्पद्रुम एप्लिकेशन

15. पा.अ. ....

16. नैषधीयचरितम्, पृ.सं. 45

17. नैषधीयचरितम्, पृ.सं. 50

18. पा.अ. ....

19. पा.अ. ....

20. नैषधीयचरितम्, पृ.सं. 58

21. शब्दकल्पद्रुम एपलिकेशन

22. नैषधीयचरितम्, पृ.सं. 61

23. पा.अ. ....

24. नैषधीयचरितम्, पृ.सं. 61

25. नैषधीयचरितम्, पृ.सं. 64

26. पा.अ. ....

27. नैषधीयचरितम्, पृ.सं. 67

28. पा.अ. ....

29. नैषधीयचरितम्, पृ.सं. 75

30. अमरकोश एप्लिकेशन्

31. पा.अ. ....
32. नैषधीयचरितम्, पृ.सं. 86
33. पा.अ. ....
34. पा.अ. ....
35. पा.अ. ....
36. नैषधीयचरितम्, पृ.सं. 85
37. पा.अ. ...
38. अमरकोश एप्लिकेशन्
39. वही
40. अमरकोश एप्लिकेशन्
41. वही
42. नैषधीयचरितम्, पृ.सं. 99
43. पा.अ. ....
44. वही
45. वही
46. नैषधीयचरितम्, पृ.सं. 106
47. शब्दकल्पद्रुम एप्लिकेशन्
48. वही
49. वही
50. पा.अ. ...
51. नैषधीयचरितम्, पृ.सं. 41
52. शब्दकल्पद्रुम एप्लिकेशन्
53. पा.अ. ...
54. शब्दकल्पद्‌रम एप्लिकेशन्
55. पा.अ. ...
56. नैषधीयचरितम्, पृ.सं. 124
57. पा.अ. ....
58. वही
59. नैषधीयचरितम्, पृ.सं. 124
60. पा.अ. ...
61. नैषधीयचरितम्, पृ.सं. 125
62. नैषधीयचरितम्, पृ.सं. 125
63. पा.अ. ....

**Corresponding Author**

**Parveen Sharma***

Sanskrit Pali and Natural Department, Maharishi Dayanand University, Rohtak, Haryana

attriparveen4@gmail.com

www.ignited.in